# DhuNDhiswarUpavarNanastotram

# ઢુણ્ઢિસ્વરૂપવર્ણનસ્તોત્રમ્

## Document Information

Text title : DhuMDhiswarUpavarNanastotram

File name : DhuMDhiswarUpavarNanastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj

Proofread by : Karthik Chandan.P : Amith K Nagaraj (amithkn at rediffmail.com)

Latest update : January 5, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# ઢુણ્ઢિસ્વરૂપવર્ણનસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
જૈમિનિરુવાચ ।
ન વક્તું શક્ત્યે રાજન્ કેનાપિ તત્સ્વરૂપકમ્ ।
નોપાધિના યુતં ઢુણ્ઢિં વદામિ શ‍ૃણુ તત્ત્વતઃ ॥ ૧॥

અહં પુરા સુશાન્ત્યર્થં વ્યાસસ્ય શરણં ગતઃ ।
મહ્યં સઙ્કથિતં તેન સાક્ષાન્નારાયણેન ચ ॥ ૨॥

તદેવ ત્વાં વદિષ્યામિ સ્વશિષ્યં ચ નિબોધ મે ।
યદિ તં ભજસિ હ્યદ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩॥

દેહદેહિમયં સર્વં ગકારાક્ષરવાચકમ્ ।
સંયોગાયોગરૂપં યદ્ બ્રહ્મ ણકારવાચકમ્ ॥ ૪॥

તયોઃ સ્વામી ગણેશશ્ચ પશ્ય વેદે મહામતે ।
ચિત્તે નિવાસકત્વાદ્વૈ ચિન્તામણિઃ સ કથ્યતે ॥ ૫॥

ચિત્તરૂપા સ્વયં બુદ્ધિર્ભ્રાન્તિરૂપા મહીપતે ।
સિદ્ધિસ્તત્ર તયોર્યોગે પ્રલભ્યેત્ તયોઃ પતિઃ ॥ ૬॥

દ્વિજ ઉવાચ ।
શ‍ૃણુ રાજન્ ગણેશસ્ય સ્વરૂપં યોગદં પરમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં ધારિતં ચેન્નરેણ વૈ ॥ ૭॥

ચિત્તે ચિન્તામણિઃ સાક્ષાત્પઞ્ચચિત્તપ્રચાલકઃ ।
પઞ્ચવૃત્તિનિરોધેન પ્રાપ્યતે યોગસેવયા ॥ ૮॥

અસમ્પ્રજ્ઞાતસંસ્થશ્ચ ગજશબ્દો મહામતે ।
તદેવ મસ્તકં યસ્ય દેહઃ સર્વાત્મકોઽભવત્ ॥ ૯॥

ભ્રાન્તિરૂપા મહામાયા સિદ્ધિર્વામાઙ્ગસંશ્રિતા ।

ભ્રાન્તિધારકરૂપા સા બુદ્ધિશ્ચ દક્ષિણાઙ્ગકે ॥ ૧૦॥

તયોઃ સ્વામિ ગણેશશ્ચ માયાભ્યાં ખેલતે સદા ।
સમ્ભજસ્વ વિધાનેન તદા સંલભસે નૃપ ॥ ૧૧॥

ઇતિ ઢુણ્ઢિસ્વરૂપવર્ણનસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by
Karthik Chandan.P (kardan5380 at yahoo.com)
Amith K Nagaraj (amithkn at rediffmail.com)

*DhuNDhiswarUpavarNanastotram*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*